क्रम सं०

प्रवेश सं० १८१६९ विषयः पुराणेतिहासम्

ग्रन्थकार

नाम चैत्रकृष्णपक्षपापमोचनीमाहात्म्यम् (भविष्योत्तरपुराणस्थम्)

पत्र सं० २ पत्रद्वयम्

अक्षर सं० (पंक्तौ) ३६ पंक्ति सं० (पृष्ठे) १०

श्लोक सं०

आकार: ९.७" x ४.७" लिपि: दे.ना. आधार: का.

14727

वि० विवरणम् अपू०

पी० एस० यू० पी०--७७ एम० सी० ई०--१६४१--५० ००० न. ३७७६

Indira Gandhi National Centre for the Arts

यावत्प्रभातसंध्या स्यात्तावत्तिष्ठ मदंतिके इति श्रुत्वा मुनेर्वाक्यं भयभीताऽभवत्
पुनर्वै रमयामास तमृषिं तपसत्तम मुनेः शापभयाद्भीता बहून्परिवत्सरान् वर्ष
णां पंचपंचाशत् ५५ नवमासा ९ दिनत्रयं ३ सा रेमे मुनिना सार्द्धं निशार्द्धमिव चाभवत्
ता तं पुनरुवाचाथ तस्मिन्काले गते मुनिं आदेशो दीयतां ब्रह्मन्नहं स्वर्गं गंतुं प्रति २६
मेधावी उवाच प्रातःकालोधुनेवास्ति श्रूयतां वचनं मम कुर्वे संध्यां नातियावत्ता
वत्त्वं सुस्थिरा भव इति वाक्यं मुनेः श्रुत्वा भयानंदसमाकुला स्मितं कृत्वा तु सा किंचि
त्प्रस्तुवाप सुविस्मितं अप्सरोवाच कियत्प्रमाणो विप्रेंद्र तव संध्या गतानघ मयि प्रस
दं कृत्वा तु गतः कालो विचार्यतां इति तस्या वचः श्रुत्वा विस्मयोत्फुल्ललोचनः
संध्यां त्वाह द्विविप्रेंद्रः प्रमाणमकरोत्तदा समाः सप्तपंचाशज्ज्ञात्वा ममतेया सरुषुक्रोध
संततस्तस्य ज्वालामालाऽभवत् नेत्राभ्यां विस्फुलिंगान्समुद्वमन्नति कोपतः

Indira Gandhi National
Centre for the Arts

कालरूपां तु तां दृष्ट्वा तपसः क्षयकारिणीं दुःखार्जितं मम तपो नीतं तदनया क्षयं॥
सकंपो मुनिस्तत्र प्लुवाचाव्याकुलेंद्रियः तां शशाप स मेधावी त्वं पिशाची भवेति वै॥
धिक्त्वां पापे दुराचारे कुलटे पातकप्रिये इति शापेन सा दग्धा विनयावनतास्थिता उवाच
वचनं सुभ्रू प्रसादं कांक्षती मुनिं प्रसादं कुरु विप्रेंद्र शापानुग्रहं कुरु सतां संगो हि भवति
वचोभिः सप्तमपदे त्वया सह मम वत्सन्नीता बहवो वत्सराः एतस्मात्कारणात्स्वामि
न्प्रसादं कुरु सुव्रत मुनिरुवाच शृणु मे वचनं भद्रे शापानुग्रहकारकं किं करोमि त्वया
पापक्षयं नीतं तपो मम चैत्रस्य कृष्णपक्षे या भवत्येकादशी पुनः पापमोचनी नाम १८
सर्वपापक्षयंकरी तस्या व्रते कृते सुभ्रू पिशाचत्वं प्रयास्यति इत्युक्त्वा तां मेधावी जगा
म पितुराश्रमं तमागतं समालोक्य च्यवनः प्रत्युवाच ह किमेतद्विहितं पुत्र त्वया पुण्य
क्षयं कृतं मेधाव्युवाच पापकर्म कृतं तात रमिता चाप्सरा मया प्रायश्चित्तं ब्रूहि तात येन पा

च्यवन उवाच चैत्रस्यासिते पक्षे नाम्ना वै पापमोचनी अस्या व्रते कृते पुत्र सर्वपापक्षयं
व्रजेत् इति श्रुत्वा पितुर्वाक्यं कृतं तेन व्रतोत्तमं गतं पापं क्षयं तस्य पुण्ययुक्तो बभूव सः उ
साप्येवं मंजुघोषा च कृत्वैतद्व्रतमुत्तमं पिशाचत्वविनिर्मुक्ता पापमोचनिकाव्रतात् दिव्यरू
पधरा सा च गता नाकं वराप्सराः इत्थं प्रभावं हि पापमोचनिकाव्रतं पापमोचनिकां
राजन्ये कुर्वन्ति नरोत्तमाः तेषां पातकं किंचिन्न सर्वं क्षयं व्रजेत् पठनाच्छ्रवणाद्राजन्गो
सहस्रफलं लभेत् ब्रह्महा हेमहारी च सुरापो गुरुतल्पगः व्रतस्यास्य चास्य करणा
त्पापमुक्ता भवंति ते बहुपुण्यप्रदं चैतत्कारणाद्व्रतमुत्तमं ४८ इति श्रीभविष्योत्तरपुराणे
चैत्रकृष्ण पापमोचनी माहात्म्यं युधिष्ठिर उवाच वासुदेव नमस्तुभ्यं कथय प्रसादतः चैत्र
स्य शुक्लपक्षे तु किं नामैकादशी भवेत् १ श्रीकृष्ण उवाच शृणुष्वैकमना राजन् कथयामि पुरातनीं
वसिष्ठो यामकथयत् दिलीपाय पृच्छते दिलीप उवाच भगवन् श्रोतुमिच्छामि कथयस्व प्रसा

Indira Gandhi National Centre for the Arts

४

चैत्रे मासि सिते पक्षे किं नामैकादशी भवेत् वसिष्ठ उवाच साधु पृष्टं नृपश्रेष्ठ कथयपा
मि तवाग्रतः चैत्रस्य शुक्लपक्षे वै कामदा नाम नामतः एकादशी पुण्यतमा पापेंध
नदवानलः शृणु राजन्कथामेतां पापघ्नीं पुण्यवर्द्धिनीं पुरा नागपुरे रम्ये हेमरत्नवि
भूषिते पुंडरीकमुखा नागा निवसंति मदोत्कटाः तस्मिन्पुरे पुंडरीको राजा स राजकरो
तिथ गंधर्वैः किन्नरैश्चैव अप्सरोभिः प्रसेव्यते वराप्सरा तु ललिता गंधर्वो ललि
तस्तथा उभौ रागेण संरक्तौ दंपती कामपीडितौ रेमाते स्वगृहे रम्ये धनधान्ययुते
तथा ललितायाः सहृदये पतिर्भावति सर्वदा हृदये तस्य ललिता नित्यं वसति भा
मिनी एकदा पुंडरीकाद्याः क्रीडंति सदसि स्थिताः गीतं गानं प्रकुरुते ललितो दयिता
स्मरन् मनोभवं विदित्वा वै नं च तत्र भुजंगराट् स क्रोधं तु तदा वाक्यं पुंडरीकोब्रवी
त्नृपः क्रोधसंरक्तनयनो वपुषा तिभयंकरः शशाप ललितं तत्र गायंतं मदनातुरं